मार्कण्डेयपुराणम्/अध्यायः ०२१-०२५



Exported from Wikisource on २३ जनवरीमासः २०२४

21(19) एकविंशोऽध्यायः

पितोवाच

गालवेन समं गत्वा नृपपुत्रेण तेन यत् ।
कृतं तत् कथ्यतां पुत्रौ विचित्रा युवयोः कथा ॥२१.१ ॥

पुत्रावूचतुः

स गालवाश्रमे रम्ये तिष्ठन् भूपालनन्दनः ।
सर्वविघ्नोपशमनं चकार ब्रह्मवादिनाम् ॥२१.२ ॥

वीरं कुवलयाश्वं तं वसन्तं गालवाश्रमे ।
मदावलेपोपहतो नाजानाद्दानवाधमः ॥२१.३ ॥

ततस्तं गालवं विप्रं सन्ध्योपासनतत्परम् ।
शौकरं रूपमास्थाय प्रधर्षयितुमागतम् ॥२१.४ ॥

मुनिशिष्यैरथोत्क्रुष्टे शीघ्रमारुह्य तं हयम् ।
अन्वधावद्वराहं तं नृपपुत्रः शरासनी ॥२१.५ ॥

आजघान च बाणेन चन्द्रार्धाकारवर्चसा ।
आकृष्य बलवच्चापं चारुचित्रोपशोभितम् ॥२१.६ ॥

नाराचाभिहतः शीघ्रमात्मत्राणपरो मृगः ।
गिरिपादपसम्बाधां सोऽन्वक्रामन्महाटवीम् ॥२१.७ ॥

तमन्वधावद्वेगेन तुरगोऽसौ मनोजवः ।
चोदितो राजपुत्रेण पितुरादेशकारिणा ॥२१.८ ॥

अतिक्रम्याथ वेगेन योजनानि सहस्रशः ।
धरण्यां विवृते गर्ते निपपात लघुक्रमः ॥२१.९ ॥

तस्यानन्तरमेवाशु सोऽप्यश्वी नृपतेः सुतः ।
निपपात महागर्ते तिमिरौघसमावृते ॥२१.१० ॥

ततो नादृश्यत मृगः स तस्मिन् राजसूनुना ।
प्रकाशञ्च स पातालमपश्यत् तत्र नापि नम् ॥२१.११ ॥

ततोऽपश्यत् स सौवर्ण-प्रासादशतसंकुलम् ।
पुरन्दरपुरप्रख्यं पुरं प्राकारशोभितम् ॥२१.१२ ॥

तत् प्रविश्य स नापश्यत् तत्र कञ्चिन्नरं पुरे ।
भ्रमता च ततो दृष्टा तत्र योषित् त्वरान्विता ॥२१.१३ ॥

सा पृष्टा तेन तन्वङ्गी प्रस्थिता केन कस्य वा ।
नोवाच किञ्चित् प्रासादमारुरोह च भामिनी ॥२१.१४ ॥

सोऽप्यश्वमेकतो बद्धा तामेवानुससार वै ।
विस्मयोत्फुल्लनयनो निः शङ्को नृपतेः सुतः ॥२१.१५ ॥

ततोऽपश्यत् सुविस्तीर्णे पर्यङ्के सर्वकाञ्चने ।
निषण्णां कन्यकामेकां कामयुक्तां रतीमिव ॥२१.१६ ॥

विस्पष्टेन्दुमुखीं सुभ्रूं पीनश्रोणिपयोधराम् ।
बिम्बाधरोष्ठीं नन्वङ्गीं नीलोत्पलविलोचनाम् ॥२१.१७ ॥

रक्ततुङ्गनखीं श्यामां मृद्वीं ताम्रकराङ्घ्रिकाम् ।
करभोरुं सुदशनां नीलसूक्ष्मस्थिरालकाम् ॥२१.१८ ॥

तां दृष्ट्वा चारुसर्वाङ्गीमनङ्गाङ्गलतामिव ।
सोऽमन्यत् पार्थिवसुतस्तां रसातलदेवताम् ॥२१.१९ ॥

सा च दृष्ट्वैव तं बाला नीलकुञ्चितमूर्धजम् ।
पीनोरुस्कन्धबाहुं तममंस्त मदनं शुभा ॥२१.२० ॥

उत्तस्थौ च महाभागा चित्तक्षोभमवाप्य सा ।
लज्जाविस्मयदैन्यानां सद्यस्तन्वी वशं गता ॥२१.२१ ॥

कोऽयं देवो नु यक्षो वा गन्धर्वो वोरगोऽपि वा ।
विद्याधरो वा सम्प्राप्तः कृतपुण्यरतिर्नरः ॥२१.२२ ॥

एवं विचिन्त्य वहुधा निश्वस्य च महीतले ।
उपविश्य ततो भेजे सा मूर्च्छां मदिरक्षणा ॥२१.२३ ॥

सोऽपि कामशराघातमवाप्य नृपतेः सुतः ।
तां समाश्वासयामास न भेतव्यमिति ब्रुवन् ॥२१.२४ ॥

सा च स्त्री या तदा दृष्टा पूर्वं तेन महात्मना ।
तालवृन्तमुपादाय पर्यवीजयदाकुला ॥२१.२५ ॥

समाश्वास्य तदा पृष्टा तेन संमोहकारणम् ।
किञ्चिल्लज्जान्विता बाला तस्याः सख्युर्न्यवेदयत् ॥२१.२६ ॥

सा चास्मै कथयामास नृपपुत्राय विस्तरात् ।
मोहस्य कारणं सर्वं तद्दर्शनसमुद्भवम् ।
यथा तया समाख्यातं तद्वृत्तान्तञ्च भामिनी ॥२१.२७ ॥

स्त्र्युवाच

विश्वावसुरिति ख्यातो दिवि गन्धर्वराट् प्रभो ।
तस्येयमात्मजा सुभ्रूर्नाम्नरा ख्याता मदालसा ॥२१.२८ ॥

वज्रकेतोः सुतश्चोग्रो दानवोऽरिविदारणः ।
पातालकेतुर्विख्यातः पातालान्तरसंश्रयः ॥२१.२९ ॥

तेनेयमुद्यानगता कृत्वा मायां तमोमयीम् ।
अपहृत्य मयां हीना बाला नीता दुरात्मना ॥२१.३० ॥

आगामिन्यां त्रयोदश्यामुद्वक्षयति किलासुरः ।
स तु नार्हति चार्वङ्गीं शूद्रो वेदश्रुतीमिव ॥२१.३१ ॥

अतीते च दिने बालामात्मव्यापदनोद्यताम् ।
सुरभिः प्राह नायं त्वं प्राप्स्यते दानवाधमः ॥२१.३२ ॥

मर्त्यलोकमनुप्राप्तं य एनं छेत्स्यते शरैः ।
सते भर्ता महाभागे अचिरेण भविष्यति ॥२१.३३ ॥

अहं चास्याः सखी नाम्नरा कुण्डलेति मनस्विनी ।
सुता विन्ध्यवतः पत्नी वीरपुष्करमालिनः ॥२१.३४ ॥

हते भर्तरि शुम्भेन तीर्थात् तीर्थमनुव्रता ।
चरामि दिव्यया गत्या परलोकार्थमुद्यता ॥२१.३५ ॥

पातालकेतुर्दुष्टात्मा वाराहं वपुरास्थितः ।
केनापि विद्धो बाणेन मुनीनां त्राणकारणात् ॥२१.३६ ॥

तच्चाहं तत्त्वतोऽन्विष्य त्वरिता समुपागता ।
सत्यमेव स केनापि ताडितो दानवाधमः ॥२१.३७ ॥

इयञ्च मूर्च्छामगमत् कारणं यत् शृणुष्व तत् ।
त्वयि प्रीतिमती बाला दर्शनादेव मानद ॥२१.३८ ॥

देवपुत्रोपमे चारु-वाक्यादिगुणशालिनि ।
भर्या चान्यस्य विहिता येन विद्धः स दानवः ॥२१.३९ ॥

एतस्मात् कारणान्मोहं महान्तमियमागता ।
यावज्जीवं च तन्वङ्गी दुः खमेवोपभोक्षयते ॥२१.४० ॥

त्वय्यस्या हृदयं रागि भर्ता चान्यो भविष्यति ।
यावज्जीवमतो दुः खं सुरभ्या नान्यथा वचः ॥२१.४१ ॥

अहं त्वस्याः प्रभी प्रीत्या दुः खितात्र समागता ।
यतो विशेषो नैवास्ति स्वसखी-निजदेहयोः ॥२१.४२ ॥

यद्येषाभिमतं वीरं पतिमाप्नोति शोभना ।
ततस्तपस्त्वहं कुर्यां निर्व्यलीकेन चेतसा ॥२१.४३ ॥

त्वन्तु को वा किमर्थं वा सम्प्राप्तोऽत्र महामते ।
देवो दैत्यो नु गन्धर्वः पन्नगः किन्नरोऽपि वा ॥२१.४४ ॥

न ह्यत्र मानुषगतिर्न चेदृङ्मानुषं वपुः ।
तत्त्वमाख्याहि कथितं यथैवावितथं मया ॥२१.४५ ॥

कुवलयाश्व उवाच

यन्मां पृच्छसि धर्मज्ञे कस्त्वं किं वा समागतः ।
तच्छृणुष्वामलप्रज्ञे कथयाम्यादितस्तव ॥२१.४६ ॥

राज्ञः शत्रुजितः पुत्रः पित्रा सम्प्रेषितः शुभे ।
मुनिरक्षणमुद्दिश्य गालवाश्रममागतः ॥२१.४७ ॥

कुर्वतो मम रक्षाञ्च मुनीनां धर्मचारिणाम् ।
विघ्नार्थमागतः कोषऽपि शौकरं रूपमास्थितः ॥२१.४८ ॥

मया स विद्धो बाणेन चन्द्रार्धाकारवर्चसा ।
अपक्रान्तोऽतिवेगेन तमस्म्यनुगतो हयी ॥२१.४९ ॥

पपात सहसा गर्ते सक्रीडोऽश्वश्च मामकः ।
सोऽहमश्वं समारूढस्तमस्येकः परिभ्रमन् ॥२१.५० ॥

प्रकाशमासादितवान् दृष्टा च भवती मया ।
पृष्टया च न मे किञ्चिद्भवत्या दत्तमुत्तरम् ॥२१.५१ ॥

त्वाञ्चैवानुप्रविष्टोऽहमिमं प्रासादमुत्तमम् ।
इत्येतत् कथितं सत्यं न देवोऽहं न दानवः ॥२१.५२ ॥

न पन्नगो न गन्धर्वः किन्नरो वा शुचिस्मिते ।
समस्ता पूज्यपक्षो वै देवाद्या मम कुण्डले ।
मनुष्योऽस्मि विशङ्का ते न कर्तव्यात्र कर्हिचित् ॥२१.५३ ॥

पुत्रावूचतुः

ततः प्रहृष्टा सा कन्या सखीवदनमुत्तमम् ।
लज्जाजडं वीक्षमाणा किञ्चिन्नोवाच भामिनी ॥२१.५४ ॥

सा सखी पुनरप्येनां प्रहृष्टा प्रत्युवाच ह ।
यथावत् कथितं तेन सुरभ्या वचनानुगे ॥२१.५५ ॥

कुण्डलोवाच

वीर सत्यमसन्दिग्धं भवताभिहितं वचः ।
नान्यत्र हृदयन्त्वस्या दृष्ट्वा स्थैर्यं प्रयास्यति ॥२१.५६ ॥

चन्द्रमेवाधिका कान्तिः समुपैति रविं प्रभा ।
भूतिर्धन्यं धृतिर्धीरं क्षान्तिरभ्येति चोत्तमम् ॥२१.५७ ॥

त्वयैव विद्धोऽसन्दिग्धं स पापो दानवाधमः ।
सुरभिः सा गवां माता कथं मिथ्या वदिष्यति ॥२१.५८ ॥

तद्धन्येयं सभाग्या च त्वत्सम्बन्धं समेत्य वै ।
कुरुष्व वीर यत् कार्यं विधिनैव समाहितम् ॥२१.५९ ॥

पुत्रावूचतुः

परवानहमित्याह राजपुत्रः सतां पितुः ।
सा च तं चिन्तयामास तुम्बुरुं तत्कुले गुरुम् ॥२१.६० ॥

स चापि तत्क्षणात् प्राप्तः प्रगृहीतसमित्कुशः ।
मदालसायाः सम्प्रीत्या कुण्डलागौरवेण च ॥२१.६१ ॥

प्रज्वाल्य पावकं हुत्वा मन्त्रवित् कृतमङ्गलाम् ।
वैवाहिकविधिं कन्यां प्रतिपाद्य यथागतम् ॥२१.६२ ॥

जगाम तपसे धीमान् स्वाश्रमपदं तदा ।
सा चाह तां सखीं बालां कृतार्थास्मि वरानने ॥२१.६३ ॥

संयुक्ताममुना दृष्ट्वा त्वामहं रूपशालिनीम् ।
तमस्तप्स्येऽहमतुलं निर्व्यलीकेन चेतसा ॥२१.६४ ॥

तीर्थाम्बुधूतपापा च भवित्री नेदृशी यथा ।
तञ्चाह राजपुत्रं सा प्रश्रयावनता तदा ।
गन्तुकामा निजसखी-स्नेहविक्लवभाषिणी ॥२१.६५ ॥

कुण्डलोवाच

पुंभिरप्यमितप्रज्ञ नोपदेशो भवद्विधे ।
दातव्यः किमुत स्त्रीभिरतो नोपदिशामि ते ॥२१.६६ ॥

किन्त्वस्यास्तनुमध्यायाः स्नेहाकृष्टेन चेतसा ।
त्वया विश्रम्भिता चास्मि स्मारयाम्यरिसूदन ॥२१.६७ ॥

भर्तव्या रक्षितव्या च भार्या हि पतिना सदा ।
धर्मार्थकामसंसिद्धौ भार्या भर्तृसहायिनी ॥२१.६८ ॥

यदा भार्या च भर्ता च परस्परवशानुगौ ।
तदा धर्मार्थकामानां त्रयाणामपि सङ्गतम् ॥२१.६९ ॥

कथं भार्यामृते धर्ममर्थं वा पुरुषः प्रभो ।
प्राप्नोति काममथवा तस्यां त्रितयमाहितम् ॥२१.७० ॥

तथैव भर्तारमृते भार्या धर्मादिसाधने ।
न समर्था त्रिवर्गोऽयं दाम्पत्यं समुपाश्रितः ॥२१.७१ ॥

देवाता-पितृ-भृत्यानामतिथीनाञ्च पूजनम् ।
न पुंभिः शक्यते कर्तुमृते भार्यां नृपात्मज ॥२१.७२ ॥

प्राप्तोऽपि चार्थो मनुजैरानीतोऽपी निजं गृहम् ।
क्षयमेति विना भार्यां कुभार्यासंश्रयेऽपि वा ॥२१.७३ ॥

कामस्तु तस्य नैवास्ति प्रत्यक्षेणोपलक्षयते ।
दम्पत्योः सहधर्मेण त्रयीधर्ममवाप्नुयात् ॥२१.७४ ॥

पितॄन् पुत्रैस्तथैवान्न-साधनैरतिथीन् नरः ।
पूजाभिरमरांस्तद्वत् साध्वीं भार्यां नरोऽवति ॥२१.७५ ॥

स्त्रियाश्चापि विना भर्त्रा धर्मकामार्थसन्ततिः ।
नैव तस्मात् त्रिवर्गोऽयं दाम्पत्यमधिगच्छति ॥२१.७६ ॥

एतन्मयोक्तं युवयोर्गच्छामि च यथेप्सितम् ।
वर्ध त्वमनया सार्धं धन-पुत्र-सुखायुषा ॥२१.७७ ॥

पुत्रावूचतुः

इत्युक्त्वा सा परिष्वज्य स्वसखीं तं नमस्य च ।
जगाम दिव्यया गत्या यथाभिप्रेतमात्मनः ॥२१.७८ ॥

सोऽपि शत्रुजितः पुत्रस्तामारोप्य तुरङ्गमम् ।
निर्गन्तुकामः पातालादविज्ञातो दनुसम्भवैः ॥२१.७९ ॥

ततस्तैः सहसोत्कृष्टं ह्रियते ह्रियतेऽति वै ।
कन्यारत्नं यदानीतं दिवः पातालकेतुना ॥२१.८० ॥

ततः परिघ-निस्त्रिंश-गदा-शूल-शरायुधम् ।
दानवानां बलं प्राप्तं सह पातालकेतुना ॥२१.८१ ॥

तिष्ठ तिष्ठेति जल्पन्तस्ते तदा दानवोत्तमाः ।
शरवर्षैस्तथा शूलैर्ववर्षुर्नृपनन्दनम् ॥२१.८२ ॥

स च शत्रुजितः पुत्रस्तदस्त्राण्यतिवीर्यवान् ।
चिच्छेद शरजालेन प्रहसन्निव लीलया ॥२१.८३ ॥

क्षणेन पातालतलमसिखत्त्यृष्टिशायकैः ।
छिन्नैः सञ्छन्नमभवद्धृतध्वजशरोत्करैः ॥२१.८४ ॥

ततोऽस्त्रं त्वाष्ट्रमादाय चिक्षेप प्रति दानवान् ।
तेन ते दानवाः सर्वे सह पातालकेतुना ॥२१.८५ ॥

ज्वालामालातितीव्रेण स्फुटदस्थिचयाः कृताः ।
निर्दग्धाः कापिलं तेजः समासाद्येव सागराः ॥२१.८६ ॥

ततः स राजपुत्रोऽश्वी निहत्यासुरसत्तमान् ।
स्त्रीरत्नेन समं तेन समागच्छत् पितुः पुरम् ॥२१.८७ ॥

प्रणिपत्य च तत् सर्वं स तु पित्रे न्यवेदयत् ।
पातालगमनञ्चैव कुण्डलायाश्च दर्शनम् ॥२१.८८ ॥

तद्वन्मदालसाप्राप्तिं दानवैश्चापि सङ्गरम् ।
वधञ्च तेषामस्त्रेण पुनरागमनं तथा ॥२१.८९ ॥

इति श्रुत्वा पिता तस्य चरितं चारुचेतसः ।
प्रीतिमानभवच्चेदं परिष्वज्याह चात्मजम् ॥२१.९० ॥

सत्पात्रेण त्वया पुत्र तारितोऽहं महात्मना ।
भयेभ्यो मुनयस्त्राता येन सद्धर्मचारिणः ॥२१.९१ ॥

मत्पूर्वैः ख्यातिमानीतं मया विस्तारितं पुनः ।
पराक्रमवता वीर त्वया तद्बहुलीकृतम् ॥२१.९२ ॥

यदुपात्तं यशः पित्रा धनं वीर्यमथापि वा ।
तन्न हापयते यस्तु स नरो मध्यमः स्मृतः ॥२१.९३ ॥

तद्वीर्यादधिकं यस्तु पुनरन्यत् स्वशक्तितः ।
निष्पादयति तं प्राज्ञाः प्रवदन्ति नरोत्तमम् ॥२१.९४ ॥

यः पिता समुपात्तानि धनवीर्ययशांसि वै ।
न्यूनतां नयति प्राज्ञास्तमाहुः पुरुषाधमम् ॥२१.९५ ॥

तन्मया ब्राह्मणत्राणं कृतमासीद्यथा त्वया ।
पातालगमनं यच्च यच्चासुरविनाशनम् ॥२१.९६ ॥

एतदप्यधिकं वत्स तेन त्वं पुरुषोत्तमः ।
तद्धन्योऽस्म्य बाल त्वमहमेव गुणाधिकम् ॥२१.९७ ॥

त्वां पुत्रमीदृशं प्राप्य श्लाघ्यः पुण्यवतामपि ।
न स पुत्रकृतां प्रीतिं मन्ये प्राप्नोति मानवः ॥२१.९८ ॥

पुत्रेण नातिशयितो यः प्रज्ञादानविक्रमैः ।
धिग्जन्म तस्य यः पित्रा लोके विज्ञायते नरः ॥२१.९९ ॥

यः पुत्रात् ख्यातिमभ्येति तस्य जन्म सुजन्मनः ।
आत्मना ज्ञायते धन्यो मध्यः पितृपितामहैः ॥२१.१०० ॥

मातृपक्षेण मात्रा च ख्यातिमेति नराधमः ।
तत् पुत्र धनवीर्यैस्त्वं विवर्धस्व सुखेन च ॥२१.१०१ ॥

घन्धर्वतनया चेयं मा त्वया वै वियुज्यताम् ।
इति पित्रा बहुविधं प्रियमुक्तः पुनः पुनः ॥२१.१०२ ॥

परिष्वज्य स्वमावासं सभार्यः स विसर्जितः ।
स तया भार्याया सार्धं रेमे तत्र पितुः पुरे ॥२१.१०३ ॥

अन्येषु च तथोद्यान-वन-पर्वतसानुषु ।
श्वश्रू-श्वसुरयोः पादौ प्रणिपत्य च सा शुभा ।
प्रातः प्रातस्ततस्तेन सह रेमे सुमध्यमा ॥२१.१०४ ॥

इति श्रीमार्कण्डेयपुराणे कुवलयाश्वीये मदालसापरिणयनं नामैकविंशोऽध्यायः

22(20)

द्वाविंशोऽध्यायः

पुत्रावूचतुः

ततः काले वहुतिथे गते राजा पुनः सुतम् ।
प्राह गच्छाशु विप्राणां त्राणाय चर मेदिनीम् ॥२२.१ ॥

अश्वमेनं समारुह्य प्रातः प्रातर्दिने दिने ।
अबाधा द्विजमुख्यानामन्वेष्टव्या सदैव हि ॥२२.२ ॥

दुर्वृत्ताः सन्ति शतशो दानवाः पापयोनयः ।
तेभ्यो न स्याद्यथा बाधा मुनीनां त्वं तथा कुरु ॥२२.३ ॥

स यथोक्तस्ततः पित्रा तथा चक्रे नृपात्मजः ।
परिक्रम्य महीं सर्वां ववन्दे चरणौ पितुः ॥२२.४ ॥

अहन्यहन्यनुप्राप्ते पूर्वाह्णे नृपनन्दनः ।
ततश्च शेषं दिवसं तया रेमे सुमध्यया ॥२२.५ ॥

एकदा तु चारन् सोऽथ ददर्श यमुनातटे ।
पातालकेतोरनुजं तालकेतुं कृताश्रमम् ॥२२.६ ॥

मायावी दानवः सोऽथ मुनिरूपं समास्थितः ।
स प्राह राजपुत्रं तं पूर्ववैरमनुस्मरन् ॥२२.७ ॥

राजपुत्र ब्रीवीमि त्वां तत् कुरुष्व यदीच्छसि ।
न च ते प्रार्थनाभङ्गः कार्यः सत्यप्रतिश्रव ॥२२.८ ॥

यक्षये यज्ञेन धर्माय कर्तव्याश्च तथेष्टयः ।
चितयस्तत्र कर्तव्या नास्ति मे दक्षैणा यतः ॥२२.९ ॥

अतः प्रयच्छ मे वीर हिरण्यार्थं स्वभूषणम् ।
यदेतत् कण्ठलग्नं ते रक्ष चेमं माश्रमम् ॥२२.१० ॥

यावदन्तर्जले देवं वरुणं यादसां पतिम् ।
वैदिकैर्वारुणैर्मन्त्रैः प्रजानां पुष्टिहेतुकैः ॥२२.११ ॥

अभिष्टूय त्वरायुक्तः समभ्येमीति वादिनम् ।
तं प्रणम्य ततः प्रादात् स तस्मै कण्ठभूषणम् ॥२२.१२ ॥

प्राह यैनं भवान् यातु निर्व्यलीकेन चेतसा ।
स्थास्यामि तावदत्रैव तवाश्रमसमीपतः ॥२२.१३ ॥

तवादेशान्महाभाग यावदागमनं तव ।
न तेऽत्र कश्चिदाबाधां करिष्यति मयि स्थिते ।
विश्रब्धश्चात्वरन् ब्रह्मन् कुरुष्व त्वं मनोगतम् ॥२२.१४ ॥

पुत्रावूचतुः

एकमुक्तस्ततस्तेन स ममज्ज नदीजले ।
ररक्ष सोऽपि तस्यैव मायाविहितमाश्रमम् ॥२२.१५ ॥

गत्वा जलाशयात् तस्मात् तालकेतुश्च तत्परम् ।
मदालसायाः प्रत्यक्षमन्येषाञ्चैतदुक्तवान् ॥२२.१६ ॥

तालकेतुरुवाच

वीरः कुवलयाश्वोऽसौ ममाश्रमसमीपतः ।
केनापि दुष्टदैत्येन कुर्वन् रक्षां तपस्विनाम् ॥२२.१७ ॥

युध्यमानो यथाशक्ति निघ्नन् ब्रह्मद्विषो युधि ।
मायामाश्रित्य पापेन भिन्नः शूलेन वक्षसी ॥२२.१८ ॥

म्रियमाणेन तेनेदं दत्तं मे कण्ठभूषणम् ।
प्रापितश्चाग्निसंयोगं स वने शूद्रतापसैः ॥२२.१९ ॥

कृतार्तह्रेषाशब्दो वै त्रस्तः साश्रुविलोचनः ।
नीतः सोऽश्वश्च तेनैव दानवेन दुरात्मना ॥२२.२० ॥

एतन्मया नृशंसेन दृष्टं दुष्कृतकारिणा ।
यदत्रानन्तरं कृत्यं क्रियतां तदकालिकम् ॥२२.२१ ॥

हृदयाश्वासनञ्चैतद् गृह्यतां कण्ठभूषणम् ।
नास्माकं हि सुवर्णेन कृत्यमस्ति तपस्विनाम् ॥२२.२२ ॥

पुत्रावूचतुः

इत्युक्त्वोत्सृज्य दत्भूमौ स जगाम यथागतम् ।
निपपात जनः सोऽथ शोकार्तो मूर्च्छयाऽतुरः ॥२२.२३ ॥

तत्क्षणात् चेतनां प्राप्य सर्वास्ता नृपयोषितः ।
राजपत्न्यश्च राजा च विलेपुरतिदुः खिताः ॥२२.२४ ॥

मदालसा तु द् दृष्ट्वा तदीयं कण्ठभूषणम् ।
तत्याजाशु प्रियान् प्राणान् श्रुत्वा च निहन्त पतिम् ॥२२.२५ ॥

ततस्तथा महाक्रन्दः पौराणां भवनेष्वभूत् ।
यथैव तस्य नृपतेः स्वगेहे समवर्तत ॥२२.२६ ॥

राजा च तां मृतां दृष्ट्वा विना भर्त्रा मदालसाम् ।
प्रत्युवाच जनं सर्वं विमृश्य सुस्थमानसः ॥२२.२७ ॥

न रोदितव्यं पश्यामि भवतामात्मनस्तथा ।
सर्वेषामेव संचिन्त्य सम्बन्धानामनित्यताम् ॥२२.२८ ॥

किन्नु शोचामि तनयं किन्नु शोचाम्यहं स्नुषाम् ।
विमृश्य कृतकृत्यत्वान्मन्ये ऽशोच्यावुभावपि ॥२२.२९ ॥

मच्छ्रुश्रूषुर्मद्वचनाद्द्विजरक्षणतत्परः ।
प्राप्तो मे यः सुतो मृत्युं कथं शोच्यः स धीमताम् ॥२२.३० ॥

अवश्यं याति यद्देहं तद्द्विजानां कृते यदि ।
मम पुत्रेण संत्यक्तं नन्वभ्युदयकारि तत् ॥२२.३१ ॥

इयञ्च सत्कुलोत्पन्ना भर्तर्येवमनुव्रतां ।
कथन्नु शोच्या नारीणां भर्तुरन्यन्न दैवतम् ॥२२.३२ ॥

अस्माकं बान्धवानाञ्च तथान्येषां दयावताम् ।
शोच्या ह्येषा भवेदेवं यदि भर्त्रा वियोगिनी ॥२२.३३ ॥

या तु भर्तुर्वधं श्रुत्वा तत्क्षणादेव भामिनी ।
भर्तारमनुयातेयं न शोच्यातो विपश्चिताम् ॥२२.३४ ॥

ताः शोच्या या वियोगिन्यो न शोच्या या मृताः सह ।
भर्त्रा वियोगस्त्वनया नानुभूतः कृतज्ञया ॥२२.३५ ॥

दातारं सर्वसौख्यानामिह चामुत्र चोभयोः ।
लोकयोः का हि भर्तारं नारी मन्येत मानुषम् ॥२२.३६ ॥

नासौ शोच्यो न चैवेयं नाहं तज्जननी न च ।
त्यजता ब्राह्मणार्थाय प्राणान् सर्वे स्म तारिताः ॥२२.३७ ॥

विप्राणं मम धर्मस्य गतः स हि महामतिः ।
आनृण्यमर्धभुक्तस्य त्यागाद् देहस्य मे सुतः ॥२२.३८ ॥

मातुः सतीत्वं मद्वंशवैमल्यं शौर्यमात्मनः ।
संग्रामे संत्यजन् प्राणान् नात्यजद् द्विजरक्षणम् ॥२२.३९ ॥

पुत्रावूचतुः

ततः कुवलयाश्वस्य माता भर्तुरनन्तरम् ।
श्रुत्वा पुत्रवधं तादृक् प्राह दृष्ट्वा तु तं पतिम् ॥२२.४० ॥

मातोवाच

न मे मात्रा न मे स्वस्त्रा प्राप्ता प्रीतिर्नृपेदृशी ।
श्रुत्वा मुनिपरित्राणे हतं पुत्रं यथा मया ॥२२.४१ ॥

शोचतां बान्धवानां ये निः श्वसन्तोऽतिदुः खिताः ।
म्रियन्ते व्याधिना क्लिष्टास्तेषां माता वृथाप्रजा ॥२२.४२ ॥

संग्रामे युध्यमाना येऽभीता गोद्विजरक्षणे ।
क्षुण्णाः शस्त्रैर्विपद्यन्ते त एव भुवि मानवाः ॥२२.४३ ॥

अर्थिनां मित्रवर्गस्य विद्विषाञ्च पराङ्मुखः ।
यो न याति पिता तेन पुत्री माता च वीरसूः ॥२२.४४ ॥

गर्भक्लेशः स्त्रियो मन्ये साफल्यं भजते तदा ।
यदारिविजयी वा स्यात् संग्रामे वा हतः सुतः ॥२२.४५ ॥

पुत्रावूचतुः

ततः स राजा संस्कारं पुत्रपत्नीमलम्भयत् ।
निर्गम्य च बहिः स्नातो ददौ पुत्राय चोदकम् ॥२२.४६ ॥

तालकेतुश्च निर्गम्य तथैव यमुनाजलात् ।
राजपुत्रमुवाचेदं प्रणयान्मधुरं वचः ॥२२.४७ ॥

गच्छ भूपालपुत्र ! त्वं कृतार्थोऽहं कृतस्त्वया ।
कार्यं चिराभिलषितं त्वय्यत्राविचले स्थिते ॥२२.४८ ॥

वारुणं यज्ञकार्यञ्च जलेशस्य महात्मनः ।
तन्मया साधितं सर्वं यन्ममासीदभीप्सितम् ॥२२.४९ ॥

प्रणिपत्य स तं प्रायाद्राजपुत्रः पुरं पितुः ।
समारुह्य तमेवाश्वं सुपर्णानिलविक्रमम् ॥२२.५० ॥

इति श्रीमार्कण्डेयपुराणे कुवलयाश्वीये मदालसावियोगो नाम द्वाविंशोऽध्यायः

23(21)

त्रयोविंशोऽध्यायः

पुत्रावूचतुः

स राजपुत्रः संप्राप्य वेगादात्मपुरं ततः ।
पित्रोर्ववन्दिषुः पादौ दिदृक्षुश्च मदालसाम् ॥२३.१ ॥

ददर्श जनमुद्विग्नमप्रहृष्टमुखं पुरः ।
पुनश्च विस्मिताकारं प्रहृष्टवदनं ततः ॥२३.२ ॥

अन्यमुत्फुल्लनयनं दिष्ट्या दिष्ट्येतिवादिनम् ।
परिष्वजन्तमन्योन्यमतिकौतूहलान्वितम् ॥२३.३ ॥

चिरं जीवोरुकल्याण ! हतास्ते परिपन्थिनः ।
पित्रोः प्रह्लादय मनस्तथास्माकमकण्टकम् ॥२३.४ ॥

पुत्रावूचतुः

इत्येवं वादिभिः पौरैः पुरः पृष्ठे च संवृतः ।
तत्क्षणप्रभवानन्दः प्रविवेश पितुर्गृहम् ॥२३.५ ॥

पिता च तं परिष्वज्य माता चान्ये च बान्धवाः ।
चिरं जीवेति कल्याणीर्ददुस्तस्मै तदाशिषः ॥२३.६ ॥

प्रणिपत्य ततः सोऽथ किमेतदिति विस्मितः ।
पप्रच्छ पितरं तात ! सोऽस्मै सम्यक् तदुक्तवान् ॥२३.७ ॥

स भार्यां तां मृतां श्रुत्वा हृदयेष्टां मदालसाम् ।
पितरौ च पुरो दृष्ट्वा लज्जाशोकाब्धिमध्यगः ॥२३.८ ॥

चिन्तयामास सा बाला मां श्रुत्वा निधनं गतम् ।
तत्याज जीवितं साध्वी धिङ्मां निष्ठुरमानसम् ॥२३.९ ॥

नृशंसोऽहमनार्योऽहं विना तां मृगलोचनाम् ।
मत्कृते निधनं प्राप्तां यज्जीवाम्यतिनिर्घृणः ॥२३.१० ॥

पुनः स चिन्तयामास परिसंस्तभ्य मानसम् ।
मोहोद्गममपास्याशु निः श्वस्योच्छ्वस्य चातरः ॥२३.११ ॥

मृतेति सा मन्निमित्तं त्यजामि यदि जीवितम् ।
किं मयोपकृतं तस्याः श्लाघ्यमेतत्तु योषिताम् ॥२३.१२ ॥

यदि रोदिमि वा दीनो हा प्रि्येति ! वदन्मुहुः ।
तथाप्यश्लाघ्यमेतन्नो वयं हि पुरुषाः किल ॥२३.१३ ॥

अथ शोकजडो दीनो स्त्रजा हीनो मलान्वितः ।

विपक्षस्य भविष्यामि ततः परिभवास्पदम् ॥२३.१४ ॥

मयारिशातनं कार्यं राज्ञः शुश्रुषणं पितुः ।
जीवितं तस्य चायत्तं सन्त्याज्यं तत्कथं मया ॥२३.१५ ॥

किन्त्वत्र मन्ये कर्तव्यस्त्यागो भागस्य योषितः ।
स चापि नोपकाराय तन्वङ्ग्याः किन्तु सर्वथा ॥२३.१६ ॥

मया नृशंस्यं कर्तव्यं नोपकार्यपकारि च ।
या मदर्थेऽत्यजत् प्राणांस्तदर्थेऽल्पमिदं मम ॥२३.१७ ॥

पुत्रावूचतुः

इति कृत्वा मतिं सोऽथ निष्पाद्योदकदानिकम् ।
क्रियाश्चानन्तरं कृत्वा प्रत्युवाच ऋतध्वजः ॥२३.१८ ॥

ऋतध्वज उवाच

यदि सा मम तन्वङ्गी न स्याद्भार्या मदालसा ।
अस्मिन् जन्मनि नान्या मे भवित्री सहचारिणी ॥२३.१९ ॥

तामृते मृगशावाक्षीं गन्धर्वतनयामहम् ।
न भोक्षये योषितं काञ्चिदिति सत्यं मयोदितम् ॥२३.२० ॥

सद्धर्मचारिणीं पत्नीं तां मुक्त्वा गजगामिनीम्, ।
काञ्चिन्नाङ्गीकरिष्यामीत्येतत् सत्यं मयोदितम् ॥२३.२१ ॥

पुत्रावूचतुः

परित्यज्य च स्त्रीभोगान् तात ! सर्वंस्तया विना ।
क्रीडन्नास्ते समं तुल्यैर्वयस्यैः शीलसम्पदा ॥२३.२२ ॥

एतत्तस्य परं कार्यं तात ! तत् केन शक्यते ।
कर्तुमत्यर्थदुष्प्राप्यमीश्वरैः किमुतेतरैः ॥२३.२३ ॥

जड उवाच

इति वाक्यं तयोः श्रुत्वा विमर्शमगमत्पिता ।
विमृश्य चाह तौ पुत्रौ नागराट् प्रहसन्निव ॥२३.२४ ॥

नागराडश्वतर उवाच

यद्यशक्यमिति ज्ञात्वा न करिष्यन्ति मानवाः ।
कर्मण्युद्यममुद्योगहान्या हानिस्ततः परम् ॥२३.२५ ॥

आरभेत नरः कर्म स्वपौरुषमहापयन् ।
निष्पत्तिः कर्मणो दैवे पौरुषे च व्यवसथिता ॥२३.२६ ॥

तस्मादहं तथा यत्नं करिष्ये पुत्रकावितः ।
तपश्चर्यां समास्थाय यथैतत् साध्यतेऽचिरात् ॥२३.२७ ॥

जड उवाच

एवमुक्त्वा स नागेन्द्रः प्लक्षावतरणं गिरेः ।
तीर्थं हिमवतो गत्वा तपस्तेपे सुदुश्चरम् ॥२३.२८ ॥

तुष्टाव गीर्भिश्च ततस्तत्र देवीं सरस्वतीम् ।
तन्मना नियताहारो भूत्वा त्रिषवणाप्लुतः ॥२३.२९ ॥

अश्वतर उवाच

जगद्धात्रीमहं देवीमारिराधयिषुः शुभाम् ।
स्तोष्ये प्रणम्य शिरसा ब्रह्मयोनिं सरस्वतीम् ॥२३.३० ॥

सदसद्देवि ! सय् किञ्चिन्मोक्षवच्चार्थवत् पदम् ।
तत्सर्वं त्वय्यसंयोगं योगवद्देवि ! संस्थितम् ॥२३.३१ ॥

त्वमक्षरं परं देवि ! यत्र सर्वं प्रतिष्ठितम् ।
अक्षरं परमं देवि ! संस्थितं परमाणुवत् ॥२३.३२ ॥

अक्षरं परमं ब्रह्म विश्वञ्चैतत् क्षरात्मकम् ।
दारुण्यवस्थितो वह्निर्भौमाश्च परमाणवः ॥२३.३३ ॥

तथा त्वयि स्थितं ब्रह्म जगच्चेदमशेषतः ।
ओङ्काराक्षरसंस्थानं यत्तु देवि ! स्थिरास्थिरम् ॥२३.३४ ॥

तत्र मात्रात्रयं सर्वमस्ति यद्देवि नास्ति च ।
त्रयो लोकास्त्रयो वेदास्त्रैविद्यं पावकत्रयम् ॥२३.३५ ॥

त्रीणि ज्योतींषि वर्णाश्च त्रयो धर्मागमास्तथा ।
त्रयो गुणास्त्रयः शब्दस्त्रयो वेदास्तथाश्रमाः ॥२३.३६ ॥

त्रयः कालास्तथावस्थाः पितरोऽहर्निशादयः ।
एतन्मात्रात्रयं देवि ! तव रूपं सरस्वति ॥२३.३७ ॥

विभिन्नदर्शिनामाद्या ब्रह्मणो हि सनातनाः ।

सोमसंस्था हविः संस्थाः पाकसंस्थाश्च सप्त याः ॥२३.३८ ॥

तास्त्वदुच्चारणाद्देवि ! क्रियन्ते ब्रह्मवादिभिः ।
अनिर्देश्यं तथा चान्यदर्धमात्रान्वितं परम् ॥२३.३९ ॥

अविकार्यक्षयं दिव्यं परिणामविवर्जितम् ।
तवैतत्परमं रूपं यन्न शक्यं मयोदितुम् ॥२३.४० ॥

न चास्ये न च तज्जिह्वा ताम्रोष्ठादिभिरुच्यते ।
इन्द्रोऽपि वसवो ब्रह्मा चन्द्रार्कौ ज्योतिरेव च ॥२३.४१ ॥

विश्वावासं विश्वरूपं विश्वेशं परमेश्वरम् ।
सांख्यवेदान्तवादोक्तं बहुशाखास्थिरीकृतम् ॥२३.४२ ॥

अनादिमध्यनिधनं सदसन्न सदेव यत् ।
एकन्त्वनेकं नाप्येकं भवभेदसमाश्रैतम् ॥२३.४३ ॥

अनाख्यं षड्गुणाख्यञ्च वर्गाख्यं त्रिगुणाश्रयम् ।
नानाशक्तिमतामेकं शक्तिवैभविकं परम् ॥२३.४४ ॥

सुखासुखं महासौख्यरूपं त्वयि विभाव्यते ।

एवं देवि ! त्वया व्याप्तं सकलं निष्कलञ्च यत् ।
अद्वैतावस्थितं ब्रह्म यच्च द्वैते व्यवस्थितम् ॥२३.४५ ॥

येर्ऽथा नित्या ये विनश्यन्ति चान्ये ये वा स्थूला ये च
सूक्ष्मातिसूक्ष्माः ।
ये वा भूमौ येऽन्तरीक्षेऽन्यतो वा तेषां तेषां त्वत्त एवोपलब्धिः ॥
२३.४६ ॥

यच्चामूर्तं यच्च मूर्तं समस्तं यद्वा भूतेष्वेकमेकञ्च किञ्चित् ।
यद्दिव्यस्ति क्ष्मातले खेऽन्यतो वा त्वत्सम्बद्धं त्वत्स्वरैर्व्यञ्जनैश्च ॥
२३.४७ ॥

जड उवाच

एवं स्तुता तदा देवी विष्णोर्जिह्वा सरस्वती ।
प्रत्युवाच महात्मानं नागमश्वतरं ततः ॥२३.४८ ॥

सरस्वत्युवाच

वरं ते कम्बलभ्रातः प्रयच्छाम्युरगाधिप ! ।
तदुच्यतां प्रदास्यामि यत्ते मनसि वर्तते ॥२३.४९ ॥

अश्वतर उवाच

सहायं देहि देवि ! त्वं पूर्वं कम्बलमेव मे ।
समस्तस्वरसम्बन्धमुभयोः संप्रयच्छ च ॥२३.५० ॥

सरस्वत्युवाच

सप्त स्वरा ग्रामरागाः सप्त पन्नगसत्तम ! ।
कीतकानि च सप्तैव तावतीश्चापि मूर्च्छनाः ॥२३.५१ ॥

तालाश्चैकोनपञ्चाशत्तथा ग्रामत्रयञ्च यत् ।
एतत्सर्वं भवान् गाता कम्बलश्च तथानघ !॥२३.५२ ॥

ज्ञास्यसे मत्प्रसादेन भुजगेन्द्रापरं तथा ।
चतुर्विधं पदं तालं त्रिः प्रकारं लयत्रयम् ॥२३.५३ ॥

यदित्रयं तथाऽतोद्यं मया दत्तं चतुर्विधम् ।
एतद्भवान् मत्प्रसादात् पन्नगेन्द्रापरञ्च यत् ॥२३.५४ ॥

अस्यान्तर्गतमायत्तं स्वरव्यञ्जनसंमितम् ।
तदशेषं मया दत्तं भवतः कम्बलस्य च ॥२३.५५ ॥

तथा नान्यस्य भूर्लोके पाताले चापि पन्नग ।
प्रणेतारौ भवन्तौ च सर्वस्यास्य भविष्यतः ।
पाताले देवलोके च भूर्लोके चैव पन्नगौ ॥२३.५६ ॥

जड उवाच

इत्युक्त्वा सा तदा देवी सर्वजिह्वा सरस्वती ।
जगामादर्शनं सद्यो नागस्य कमलेक्षणा ॥२३.५७ ॥

तयोश्च तद्यथावृत्तं भ्रात्रोः सर्वमजायत ।
विज्ञानमुभयोरग्र्यं पदतालस्वरादिकम् ॥२३.५८ ॥

ततः कैलासशैलेन्द्र-शिखरस्थितमीश्वरम् ।
गीतकैः सप्तभिर्नागौ तन्त्रीलयसमन्वितौ ॥२३.५९ ॥

आरिराधयिषू देवमनङ्गाङ्गहरं हरम् ।
प्रचक्रतुः परं यत्नमुभौ संहतवाक्कलौ ॥२३.६० ॥

प्रातर्निशायां मध्याह्ने सन्ध्ययोश्चापि तत्परौ ।
तयोः कालेन महता स्तूयमानो वृषध्वजः ॥२३.६१ ॥

तुतोष गीतकैस्तौ च प्राहेशो गृह्यतां वरः ।
ततः प्रणम्याश्वतरः कम्बलेन समं तदा ॥२३.६२ ॥

व्यज्ञापयन्महादेवं शितिकण्ठमुमापतिम् ।
यदि नौ भगवान् प्रीतो देवदेवस्त्रिलोचनः ॥२३.६३ ॥

ततो यथाभिलषितं वरमेनं प्रयच्छ नौ ।
मृता कुवलयाश्वस्य पत्नी देव ! मदालसा ॥२३.६४ ॥

तेनैव वयसा सद्यो दुहितृत्वं प्रयातु मे ।
जातिस्मरा यथा पूर्वं तद्वत्कान्तिसमन्विता ।
योगिनी योगमाता च मद्गेहे जायतां भव ॥२३.६५ ॥

महादेव उवाच

यथोक्तं पन्नगश्रेष्ठ ! सर्वमेतद्भविष्यति ।
मत्प्रसादादसन्दिग्धं श्रुणु चेदं भुजङ्गम ॥२३.६६ ॥

श्राद्धे तु समनुप्राप्ते मध्यमं पिण्डमात्मना ।
भक्षयेथाः फणिश्रेष्ठ ! शुचिः प्रयतमानसः ॥२३.६७ ॥

भक्षिते तु ततस्तस्मिन् भवतो मध्यमात् फणात् ।
समुत्पत्स्यति कल्याणी तथारूपा यथामृता ॥२३.६८ ॥

कामञ्चेममभिध्याय कुरु त्वं पितृतर्पणम् ।
तत्क्षणादेव सा सुभ्रूः श्वसतो मध्यमात् फणात् ॥२३.६९ ॥

समुत्पत्स्यति कल्याणी तथारूपा यथामृता ।
एतच्छ्रुत्वा ततस्तौ तु प्रणिपत्य महेश्वरम् ॥२३.७० ॥

रसातलं पुनः प्राप्तौ परितोषसमन्वितौ ।

तथा च कृतवान् श्राद्धं स नागः कम्बलानुजः ॥२३.७१ ॥

पिण्डञ्च मध्यमं तद्वद्यथावदुपभुक्तवान् ।
तञ्चापि ध्यायः कामं ततः सा तनुमध्यमा ॥२३.७२ ॥

जज्ञे निश्वसतः सद्यस्तद्रूपा मध्यमात् फणात् ।
न चापि कथयामास कंस्यचित् स भुजङ्गमः ॥२३.७३ ॥

अन्तर्गृहे तां सुदतीं स्त्रीभिर्गुप्तामधारयत् ।
तौ चानुदिनमागम्य पुत्रौ नागपतेः सुखम् ॥२३.७४ ॥

ऋतध्वजेन सहितौ चिक्रीडातेऽमराविव ।
एकदा तु सुतौ प्राह नागराजौ मुदान्वितः ॥२३.७५ ॥

यन्मया पूर्वमुक्तन्तु क्रियते किं न तत्तथा ।
स राजपुत्रो युवयोरुपकारी ममान्तिकम् ॥२३.७६ ॥

कस्मान्नानीयते वत्सावुपकाराय मानदः ।
एवमुक्तौ ततस्तेन पित्रा स्नेहवता तु तौ ॥२३.७७ ॥

गत्वा तस्य पुरं सख्यू रेमाते तेन धीमता ।
ततः कुवलयाश्वं तौ कृत्वा किञ्चित्कथान्तरम् ॥२३.७८ ॥

अब्रूतां प्रणयोपेतं स्वगेहगमनं प्रति ।
तावाह नृपपुत्रोऽसौ नन्विदं भवतोर्गृहम् ॥२३.७९ ॥

धनवाहनवस्त्रादि यन्मदीयं तदेव वाम् ।
यत्तु वां वाञ्छितं दातुं धनं रत्नमथापि वा ॥२३.८० ॥

तद्वोयतां द्विजसुतौ यदि वां प्रणयो मयि ।
एतावताहं दैवेन वञ्चितोऽस्मि दुरात्मना ॥२३.८१ ॥

यद्भवद्भ्यां ममत्वं नो मदीये क्रियते गृहे ।
यदि वां मत्प्रियं कार्यमनुग्राह्योऽस्मि वां यदि ॥२३.८२ ॥

तद्धने मम गेहे च ममत्वमनुकल्प्यताम् ।

युवयोर्यन्मदीयं तन्मामकं युवयोः स्वकम् ॥२३.८३ ॥

एतत् सत्यं विजानीतं युवां प्राणा बहिश्चराः ।
पुनर्नैवं विभिन्नार्थं वक्तव्यं द्विजसत्तमौ ॥२३.८४ ॥

मत्प्रसादपरौ प्रीत्या शापितौ हृदयेन मे ।
ततः स्नेहाद्र्वदनौ तावुभौ नागनन्दनौ ॥२३.८५ ॥

ऊचतुर्नृपतेः पुत्रं किञ्चित् प्रणयकोपितौ ।
ऋतध्वज ! न सन्देहो यथैवाह भवानिदम् ॥२३.८६ ॥

तथैव चास्मन्मनसि नात्र चिन्त्यमतोऽन्यथा ।
किन्त्वावयोः स्वयं पित्रा प्रोक्तमेतन्महात्मना ॥२३.८७ ॥

द्रष्टुं कुवलयाश्वं तमिच्छामीति पुनः पुनः ।
ततः कुवलयाश्वोऽसौ समुत्थाय वरासनात् ।
यथाह तातेति वदन् प्रणाममकरोद्भुवि ॥२३.८८ ॥

कुवलयाश्व उवाच

धन्योऽहमतिपुण्योऽहं कोऽन्योऽस्ति सदृशो मया ।
यत्तातो मामभिद्रष्टुं करोति प्रवणं मनः ॥२३.८९ ॥

तदुत्तिष्ठत गच्छामस्ताताज्ञां क्षणमप्यहम् ।
नातिक्रान्तुमिहेच्छामि पदेभ्यां तस्य शपाम्यहम् ॥२३.९० ॥

जड उवाच

एवमुक्त्वा ययौ सोऽथ सह ताभ्यां नृपात्मजः ।
प्राप्तश्च गोमतीं पुण्यां निर्गम्य नगराद्बहिः ॥२३.९१ ॥

तन्मध्येन ययुस्ते वे नागेन्द्रनृपनन्दनाः ।
मेने च राजपुत्रोऽसौ पारे तस्यास्तयोर्गृहम् ॥२३.९२ ॥

ततश्चाकृष्य पातालं ताभ्यां नीतो नृपात्मजः ।
पाताले ददृशे चोभौ स पन्नगकुमारकौ ॥२३.९३ ॥

फणामणिकृतोद्योतौ व्यक्तस्वस्तिकलक्षणौ ।
विलोक्य तौ सुरूपाङ्गौ विस्मयोत्फुल्ललोचनः ॥२३.९४ ॥

विहस्य चाब्रवीत् प्रेम्णा साधु भो द्विजसत्तमौ ।
कथयामासतुस्तौ च पितरं पन्नगेश्वरम् ॥२३.९५ ॥

शान्तमश्वतरं नाम माननीयं दिवौकसाम् ।
रमणीयं ततोऽपस्यत् पातालं स नृपात्मजः ॥२३.९६ ॥

कुमारैस्तरुणैर्वृद्धैरुरगैरुपशोभितम् ।
तथैव नागकन्याभिः क्रीडन्तीभिरितस्ततः ॥२३.९७ ॥

चारुकुण्डलहाराभिस्ताराभिर्गगनं यथा ।
गीतशब्दैस्तथान्यत्र वीणावेणुस्वनानुगैः ॥२३.९८ ॥

मृदङ्गपणवातोद्यं हारिवेश्मशताकुलम् ।
वीक्षमाणः स पातालं ययौ शत्रुजितः सुतः ॥२३.९९ ॥

सह ताभ्यामभीष्टाभ्यां पन्नगाभ्यामरिन्दमः ।
ततः प्रविश्य ते सर्वे नागराजनिवेशनम् ॥२३.१०० ॥

ददृशुस्ते महात्मानमुरगाधिपतिं स्थितम् ।
दिव्यमाल्याम्बरधरं मणिकुण्डलभूषणम् ॥२३.१०१ ॥

स्वच्छमुक्ताफललताहारिहारोपशोभितम् ।
केयूरिणं महाभागमासने सर्वकाञ्चने ॥२३.१०२ ॥

मणिविद्रुमवैदूर्य-जालान्तरितरूपके ।
स ताभ्यां दर्शितस्तस्य तातोऽस्माकमसाविति ॥२३.१०३ ॥

वीरः कुवलयाश्वोऽयं पित्रे चासौ निवेदितः ।
ततो ननाम चरणौ नागेन्द्रस्य ऋतध्वजः ॥२३.१०४ ॥

तमुत्थाप्य बलाद्गाढं नागेन्द्रः परीषस्वजे ।
मूर्ध्नि चैनमुपाघ्राय चिरं जीवेत्युवाच सः ॥२३.१०५ ॥

निहतामित्रवर्गश्च पित्रोः सुश्रूषणं कुरु ।
वत्स ! धन्यस्य कथ्यन्ते परोक्षस्यापि ते गुणाः ॥२३.१०६ ॥

भवतो मम पुत्राभ्यामसामान्या निवेदिताः ।
त्वमेवानेन वर्धेथा मनोवाक्कायचेष्टितैः ॥२३.१०७ ॥

जीवितं गुणिनः श्लाघ्यं जीवन्नेव मृतोऽगुणः ।
गुणवान् निर्वृतिं पित्रोः शत्रुणां हृदयज्वरम् ॥२३.१०८ ॥

करोत्यात्महितं कुर्वन् विश्वासञ्च महाजने ।
देवताः पितरो विप्रा मित्रार्थिविकलादयः ॥२३.१०९ ॥

बान्धवाश्च तथेच्छन्ति जीवितं गुणिनश्चिरम् ।
परिवादनिवृत्तानां दुर्गतेषु दयावताम् ।
गुणिनां सफलं जन्म संश्रितानां विपद्गतैः ॥२३.११० ॥

जड उवाच

एवमुक्त्वा स तं वीरं पुत्राविदमथाब्रवीत् ।
पूजां कुवलयाश्वस्य कर्तुकामो भुजङ्गमः ॥२३.१११ ॥

स्नानादिकक्रमं कृत्वा सर्वमेव यथाक्रमम् ।
मधुपानादिसम्भोगमाहारञ्च यथेप्सितम् ॥२३.११२ ॥

ततः कुवलयाश्वेन हृदयोत्सवभूतया ।
कथया स्वल्पकं कालं स्थास्यामो हृष्टचेतसः ॥२३.११३ ॥

अनुमेन च तन्मौनो वचः शत्रुजितः सुतः ।
तथा चकार नृपतिः पन्नगानामुदारधीः ॥२३.११४ ॥

समेत्य तैरात्मजभूपनन्दनैर् महोरगाणामधिपः स सत्यवाक् ।
मुदान्वितोऽन्नानि मधूनि चात्मवान् यथोपयोगं बुभुजे स भोगभुक् ॥२३.११५ ॥

इति श्रीमार्कण्डेयपुराणे मदालसोपाख्याने कुवलयाश्वपातालगमनं नाम त्रयोविंसोऽध्यायः

24(22)

चतुर्विंशोऽध्यायः

जड उवाच

कृताहारं महात्मनामधिपं पवनाशिनाम् ।
उपासाञ्चक्रिरे पुत्रौ भूपालतनयस्तथा ॥२४.१ ॥

कथाभिरनुरूपाभिः स महात्मा भुजङ्गमः ।
प्रीतिं सञ्जनयामास पुत्रसख्युरुवाच च ॥२४.२ ॥

तव भद्र ! सुखं ब्रूहि गेहमभ्यागतस्य यत् ।
कर्तव्यमुत्सृजाशङ्कां पितरीव सुतो मयि ॥२४.३ ॥

रजतं वा सुवर्णं वा वस्त्रं वाहनमासनम् ।
यद्वाभिमतमत्यर्थं दुर्लभं तद्वृणुष्व माम् ॥२४.४ ॥

कुवलयाश्व उवाच

तव प्रसादाद्भगवन् ! सुवर्णादि गृहे मम ।
पितुरस्ति ममाद्यापिन किञ्चित् कार्यमीदृशम् ॥२४.५ ॥

ताते वर्षसहस्राणि शासतीमां वसुन्धराम् ।
तथैव त्वयि पातालं न मे याञ्चोन्मुकं मनः ॥२४.६ ॥

ते स्वर्ग्याश्च सुपुण्याश्च येषां पितरि जीवति ।
तृणकोटिसमं वित्तं तारुण्याद्वित्तकोटिषु ॥२४.७ ॥

मित्राणि तुल्यशिष्टानि तद्वद्देहमनामयम् ।
जनिता ध्रियते वित्तं यौवनं किन्नु नास्ति मे ॥२४.८ ॥

असत्यर्थे नृणां याञ्चाप्रवणं जायते मनः ।
सत्यशेषे कथं याञ्चां मम जिह्वा करिष्यति ॥२४.९ ॥

यैर्न चिन्त्यं धनं किञ्चिन्मम गेहेऽस्ति नास्ति वा ।
पितृबाहुतरुच्छायां संश्रिताः सुखिनो हि ते ॥२४.१० ॥

ये तु बाल्यात् प्रभृत्येव विना पित्रा कुटुम्बिनः ।
ते सुखास्वादविभ्रंशान्मन्ये धात्रैव वञ्चिताः ॥२४.११ ॥

तद्वयं त्वत्प्रसादेन धनरत्नादिसञ्चयान् ।
पितृमुक्तान् प्रयच्छामः कामतो नित्यमर्थिनाम् ॥२४.१२ ॥

तत् सर्वमिह संप्राप्तं यदङ्घ्रियुगलं तव ।
मच्चूडामणिना स्पृष्टं यच्चाङ्गस्पर्शमाप्तवान् ॥२४.१३ ॥

जड उवाच

इत्येवं प्रसृतं वाक्यमुक्तः पन्नगसत्तमः ।
प्राह राजसुतं प्रीत्या पुत्रयोरुपकारिणम् ॥२४.१४ ॥

नाग उवाच

यदि रत्नसुवर्णादि मत्तोऽवाप्तुं न ते मनः ।
यदन्यन्मनसः प्रीत्यै तद्ब्रूहि त्वं ददाम्यहम् ॥२४.१५ ॥

कुवलयाश्व उवाच

भगवंस्त्वत्प्रसादेन प्रार्थितस्य गृहे मम ।
सर्वमस्ति विशेषेण सम्प्राप्तं तव दर्शनात् ॥२४.१६ ॥

कृतकृत्योऽस्मि चैतेन सफलं जीवितञ्च मे ।
यदङ्गसंश्लेषमितस्तव देवस्य मानुषः ॥२४.१७ ॥

ममोत्तमाङ्गे त्वत्पादरजसा यदिहास्पदम् ।
कृतं तेनैव न प्राप्तं किं मया पन्नगेश्वर ॥२४.१८ ॥

यदि त्ववश्यं दातव्यो वरो मम यथेप्सितः ।
तत्पुण्यकर्मसंस्कारो हृदयान्मा व्यपैतु मे ॥२४.१९ ॥

सुवर्णमणिरत्नादि वाहनं गृहमासनम् ।
स्त्रियोऽन्नपानं पुत्राश्च चारुमाल्यानुलेपन् ॥२४.२० ॥

एते च विविधाः कामा गीतवाद्यादिकञ्च यत् ।
सर्वमेतन्मम मतं फलं पुण्यवनस्पतेः ॥२४.२१॥

तस्मान्नरेण तन्मुलः कार्यो यत्नः कृतात्मना ।
कर्तव्यः पुण्यसक्तानां न किञ्चिद्भुवि दुर्लभम् ॥२४.२२॥

अश्वतर उवाच

एवं भविष्यति प्राज्ञ ! तव धर्माश्रिता मतिः ।
सत्यञ्चैतत् फलं सर्वं धर्मस्योक्तं यथा त्वया ॥२४.२३॥

तथाप्यवश्यं मद्गेहमागतेन त्वयाधुना ।
ग्राह्यं यन्मानुषे लोके दुष्प्राप्तं भवतो मतम् ॥२४.२४॥

जड उवाच

तस्यैतद्वचनं श्रुत्वा स तदा नृपनन्दनः ।
मुकावलोकनञ्चक्रे पन्नगेश्वरपुत्रयोः ॥२४.२५॥

ततस्तौ प्रणिपत्योभौ राजपुत्रस्य यन्मतम् ।
तत् पितुः सकलं वीरौ कथयामासतुः स्फुटम् ॥२४.२६॥

पुत्रापूचतुः

ततोऽस्य पत्नी दयिता श्रुत्वेमं विनिपातितम् ।
अत्यजद्दयितान् प्राणान् विप्रलब्धा दुरात्मना ॥२४.२७॥

केनापि कृतवैरेण दानवेन कुबुद्धिना ।
गन्धर्वराजस्य सुता नाम्ना ख्याता मदालसा ॥२४.२८ ॥

कुतज्ञोऽयं ततस्तात ! प्रतिज्ञां कृतवानिमाम् ।
नान्या भार्या भवित्रीति वर्जयित्वा मदालसाम् ॥२४.२९ ॥

द्रष्टुं तां चारुसर्वाङ्गीमयं वीर ! ऋतध्वजः ।
तात ! वाञ्छति यद्येतत् क्रियते तत् कृतं भवेत् ॥२४.३० ॥

अश्वतर उवाच

भूतैर्वियोगिनो योगस्तादृशैरेव तादृशः ।
कथमेतद्विना स्वप्नं मायां वा शम्बरोदिताम् ॥२४.३१ ॥

जड उवाच

प्रणिपत्य भुजङ्गेशं पुत्रः शत्रुजितस्ततः ।
प्रत्युवाच महात्मानं प्रेमलज्जासमन्वितः ॥२४.३२ ॥

मायामयीमप्यधुना मम तात ! मदालसाम् ।
यदि दर्शयते मन्ये परं कृतमनुग्रहम् ॥२४.३३ ॥

अश्वतर उवाच

तस्मात् पश्येह वत्स ! त्वं मायाञ्चेद् द्रष्टुमिच्छसि ।
अनुग्राह्यो भवान् गेहं बालोऽप्यभ्यागतो गुरुः ॥२४.३४ ॥

जड उवाच

आनयामास नागेन्द्रो गृहगुप्तां मदालसाम् ।
तेषां संमोहनार्थाय ज्जल्प च ततः स्फुटम् ॥२४.३५ ॥

दर्शयामास च तदा राजपुत्राय तां शुभाम् ।
सेयं न वेति ते भार्या राजपुत्र ! मदालसा ॥२४.३६ ॥

जड उवाच

स दृष्ट्वा तां तदा तन्वीं तत्क्षणात् विगतत्रपः ।
प्रियेति तामभिमुखं ययौ वाचमुदीरयन् ।
निवारयामास च तं नागः सोऽश्वतरस्त्वरन् ॥२४.३७ ॥

अश्वतर उवाच

मायेयं पुत्र ! मा स्प्राक्षीः प्रागेव कथितं तव ।
अन्तर्धानमुपैत्याशु माया संस्पर्शनादिभिः ॥२४.३८ ॥

ततः पपात मेदिन्यां स तु मूर्च्छापरिप्लुतः ।
हा प्रियेति वदन् सोऽथ चिन्तयामास भामिनीम् ॥२४.३९ ॥

अहो स्नेहोऽस्य नृपतेर्ममोपर्यचलं मनः ।
येनायं पातनोऽरीणां विना शस्त्रेण पातितः ॥२४.४०॥

मायेति दर्शिता तेन मिथ्या मायेति यत्स्फुटम् ।
वाय्वम्बुतेजसां भुमेराकाशस्य च चेष्टया ॥२४.४१॥

जड उवाच

ततः कुवलयाश्वं तं समाश्वास्य भुजङ्गमः ।
कथयामास तत् सर्वं मृतसञ्जीवनादिकम् ॥२४.४२॥

ततः प्रहृष्टः प्रतिलभ्य कान्तां प्रणम्य नागं निजगाम सोऽथ ।
सुशोभमानः स्वपुरं तमश्वम् आरुह्य संचिन्तितमभ्युपतेम् ॥
२४.४३॥

इति श्रीमार्कण्डेयपुराणे मदालसाप्राप्तिर्नाम चतुर्विंशोऽध्यायः

25(23)

पञ्चविंशोऽध्यायः

जड उवाच

आगम्य स्वपुरं सोऽथ पित्रोः सर्वमशेषतः ।
कथयामास तन्वङ्गी यथा प्राप्ता पुनर्मृता ॥२५.१॥

ननाम सा च चरणौ श्वश्रूश्वशुरयोः शुभा ।
स्वजनञ्च यथापूर्वं वन्दनाश्लेषणादिभिः ॥२५.२ ॥

पूजयामास तन्वङ्गी यथान्यायं यथावयः ।
ततो महोत्सवो जज्ञे पौराणां तत्र वै पुरे ॥२५.३ ॥

ऋतध्वजश्च सुचिरं तया रेमे सुमध्यया ।
निर्झरेषु च शैलानां निम्नगापुलिनेषु च ॥२५.४ ॥

काननेषु च रम्येषु तथैवोपवनेषु च ।
पुण्यक्षयं वाञ्छमाना सापि कामोपबोगतः ॥२५.५ ॥

सह तेनातिकान्तेन रेमे रम्यासु भूमिषु ।
ततः कालेन महता शत्रुजित् स नराधिपः ॥२५.६ ॥

सम्यक् प्रशास्य वसुधां कालधर्ममुपेयिवान् ।
ततः पौरा महात्मानं पुत्रं तस्य ऋतध्वजम् ॥२५.७ ॥

अभ्यषिञ्चन्त राजानमुदाराचारचेष्टितम् ।
सम्यक् पालयतस्तस्य प्रजाः पुत्रानिवौरसान् ॥२५.८ ॥

मदालसायाः सञ्जज्ञे पुत्रः प्रथमजस्ततः ।
तस्य चक्रे पिता नाम विक्रान्त इति धीमतः ॥२५.९ ॥

तुतुषुस्तेन वै भृत्या जहास च मदालसा ।
सा वै मदालसा पुत्रं बालमुत्तानशायिनम् ।
उल्लापनच्छलेनाह रुदमानमविस्वरम् ॥२५.१० ॥

शुद्धोऽसि रे तात ! न तेऽस्ति नाम कृतं हि ते कल्पनयाधुनैव ।
पञ्चात्मकं देहमिदं तवैतन् नैवास्य त्वं रोदिषि कस्य हेतोः ॥

२५.११ ॥

न वा भवान् रोदिति वै स्वजन्मा शब्दोऽयमासाद्य महीशशूनुम् ।
विकल्प्यमाना विविधा गुणास्ते ऽगुणाश्च भौताः सकलेन्द्रियेषु ॥
२५.१२ ॥

भूतानि भूतैः परिदुर्बलानि वृद्धिं समायान्ति यथेह पुंसः ।
अन्नाम्बुपानादिभिरेव कस्य न तेऽस्ति वृद्धिर्न च तेऽस्ति हानिः ॥
२५.१३ ॥

त्वं कञ्चुके शीर्यमाणे निजेऽस्मिंस् तस्मिंश्च देहे मूढतां मा व्रजेथाः
।
शुभाशुभैः कर्मभिर्देहमेतन् मदादिमूढैः सञ्चुकस्तेऽपिनद्धः ॥
२५.१४ ॥

तातेति किञ्चित्तनयेति किञ्चिद् अम्बेति किञ्चिद्दयितेति किञ्चित् ।
ममेति किञ्चिन्न ममेति किञ्चित् त्वं भूतसङ्घं बहुमानयेथाः ॥२५.१५ ॥

दुः खानि दुः खोपगमाय भोगान् सुखाय जानाति विमूढचेताः ।
तान्येव दुः खानि पुनः सुखानि जानात्यविद्वान सुविमूढयेताः ॥
२५.१६ ॥

हासोऽस्थिसन्दर्शनमक्षियुग्मम् अत्युज्ज्वलं तर्जनमङ्गनायाः ।
कुचादिपीनं पिशितं घनं तत् स्थानं रतेः किं नरकं न योषित् ॥
२५.१७ ॥

यानं क्षितौ यानगतञ्च देहं देहेऽपि चान्यः पुरुषो निविष्टः ।
ममत्वबुद्धिर्न तथा यथा स्वे देहेऽतिमात्रं बत मूढतैषा ॥२५.१८ ॥

इति श्रीमार्कण्डेयपुराणे मदालसोपाख्याने पञ्चविंशोऽध्यायः

About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

We distribute our books for free, starting from works not copyrighted or published under a free license. You are free to use our e-books for any purpose (including commercial exploitation), under the terms of the Creative Commons Attribution-ShareAlike 3.0 Unported[2] license or, at your choice, those of the GNU FDL[3].

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- अनुनाद सिंह
- Puranastudy

---

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium